# अथ दाशरथ्यष्टकम्

१) क्षीरसागरवारिमध्यमहाहिभोगनिवासिनिं  नारदादिमुनीन्द्रवन्दितचारुपादसरोरुहम् ।
वारिजामलपत्रलोचनमब्धिजारमणं विभुं  नारसिंहतनुं हरिं प्रणमामि दाशरथिं सदा ॥

२) पाकशसनवन्दितामलपादयुग्मसरोरुहं  शोकनाशनमीशमीशमशेषदोषविवर्जितम् ।
लोकसम्भवसंहृतिस्थितिहेतुभूतगुणोदयं  नाकवासिजनप्रियं प्रणमामि दाशरथिं सदा ॥

३) अण्डजाधिपवाहनं शशिमण्डलाभमुखं महा  दण्डकावनसेवितं वरकुण्डलाङ्गदभूषणम् ।
चण्डविक्रमखण्डितासुरमण्डलं मधुसूधनं  पाण्डवप्रियसारथिं  प्रणमामि दाशरथिं सदा ॥

४) तर्कनिश्चितचित्तवृत्तिभिरप्रतर्क्यगुणोदयं  शक्रगर्वविदारणं  धृतचक्रमक्रमवर्जितम् ।
अर्कमण्डलममध्यवर्तिनमक्षयं पुरुषोत्तमं  शुक्रनेत्रहरं हरिं प्रणमामि दाशरथिं सदा ॥

५) बालकेलिमशेषदानवनाशनं प्रणवात्मकं  स्थूलसूक्ष्मतनुं विभुं गुणकारणात्मगुणोदयं ।
लीलया धृतभूधरं परिपारिपालिताखिलगोकुलं नीलकन्चितमूर्धजं प्रणमामि दाशरथिं सदा ॥

६) मन्दराचलधारिणं दशकन्धरादिविनाशनं  नन्दनाङ्गमुमापतेः प्रियमिन्दिरावरमच्युतम् ।
कन्दजासनसेवितं  सुरवृन्दवन्दितविग्रहं  नन्दगोपसुतं हरिं प्रणमामि दाशरथिं सदा ॥

७) कंसमुष्टिकदुष्टधेनुकपूतनादिविनाशनं  हंसकेशिनिसूदनं दमघोषसूनुविदारणम् ।
अंसमध्यलसन्महामणिकौस्तुभादिविराजितं  हिंसकासुरभेदकं प्रणमामि दाशरथिं सदा ॥

८) गोपिमण्डलमध्यगं सुरवैरिमण्डलदारिणं  पाण्डवप्रियमिन्द्रपूर्वसुरौघवन्द्यपदाम्बुजम् ।
इन्दिरारमणं गुणार्णवमम्बुजाक्षममानुशं नारसिंहतनुं  हरिं प्रणमामि दाशरथिं सदा ॥

९) भक्तिपूर्वकमेतदष्टकमिष्टसिद्दिदमादराद् यस्तु कीर्तयते  श्रणोत्यखिलापदर्णवतारकम् ।
सर्वदेववरार्चितं नृहरेः पदं परमक्षयं याति दाशरथेरनुग्रहविग्रहोऽखिलवल्लभः ॥